८७६

नं० ८१६-घ

(क) १०पत्रे
पुण्यतिथ्यातकम्

(ख) १० पत्रे
वृन्दावनघातकम्

ग ४ पत्रे
वृन्दावनयमकम्

नं० ८१६-घ

10+10+4=24 पत्राणि

नं० ८१६-घ

(क) शान्तिशतकम् = पत्राणि १०(दश)

(ख) वृन्दावनशतकम् = पत्राणि १०(दश)

(ग) वृन्दावनयमकम् = पत्राणि ४(चत्वारि)

सर्वाणि पत्राणि = २४

शांति. ओम् ॥ ॥ ओं नमस्यामो देवान् ननु हतविधेस्तेपि वशगा विधिर्वंद्यः सोपि प्र
शत. तिनियतकर्मैकफलदः फलं कर्मायत्तं किममरगणैः किं च विधिना नमस्तत्कर्मभ्यो
विधिरपि न येभ्यः प्रभवति ॥१॥ यदि शान्तो मनो देयं यदा मुक्तिपदे रतिः। तदा शिल्हन
मिश्रस्य पद्मारभ्यतां धिया ॥२॥ सन्तापसन्ततिकरं विदुषां कवीनां संसारिकाप्रतिमदुः
खविनाशबीजं यत्नेन शान्तिशतकं विदधे विवेकी श्रीशिल्हनः प्रकृतिसुन्दरशुद्धबुद्धिः ३॥
आत्मज्ञानविवेकनिर्मलधियः कुर्वन्त्यहो दुष्करं यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्त
तो निस्पृहाः न प्राप्तानि पुरा न संप्रति न च प्राप्तौ दृढप्रत्यया वाञ्छामात्रपरिग्रहाण्यपि वयं
त्यक्तुं न तानि क्षमाः ।४। धन्यानां गिरिकन्दरोदरभुवि ज्योतिः परं ध्यायतां आनंदाश्रुज
लं पिबन्ति शकुना निःशङ्कमङ्कस्थिताः अस्माकं तु मनोरथोपरिचितप्रासादवापीतट।
क्रीडाकाननकेलिमण्डपयुषामायुः परं क्षीयते ।५। विशीर्णाः प्रारम्भा वपुरपि जराव्या
धिविधुरं गतं दूरे विप्रस्वजनमरणं वांछितमपि इदानीं व्यामोहादहह विपरीते हतविधौ।

शांति. विधेयं यत्तत्वं स्फुरतिममनाद्यापिहृदये ॥६॥ वीभत्साः प्रतिभांति किन्नविषयाः
श्री. किन्तुस्पृहागृध्नती देहस्यापचयो मतोनिविशते गाढोगृहेषुग्रहः ब्रह्मोपास्यमि
३६ तिस्फुरत्यपिहृदिव्यावर्त्तिकावासना कामामेयमतर्क्यहेतुगहना दैवीसतांयातना ॥७॥
अजानन्दाहार्तिं विशतिशलभोदीपदहने नमीनोपित्वात्वाहृतवडिशमश्नातिपिशितं ।
विजानन्तोप्येतान् वयमिह विपज्जालजटिलान् नमुञ्चामःकामानहहगहनोमोह
महिमा ॥८॥ क्षांतं नक्षमया गृहोचितसुखंत्यक्तं नसंतोषतः सोढाद्दुःसहशीतवात
तपनक्लेशानतप्तन्तपः ध्यातंवित्तमहर्निशंनचपुनर्विष्णोःपदंशाश्वतं । तत्तत्
कर्मकृतं यदेवमुनिभिस्तैस्तैःफलैर्वंचितं ॥९॥ कृत्वाशत्रुविभीषिकां कतिपयग्रामे
षुदीनाःप्रजा मथ्नन्तोविटजल्पितेहृपहृतादोर्गणीभुजेस्मिकिल विद्वांसोपि वयं
किलत्रिजगतीसर्गस्थितिप्रापदाम् ईशस्त्वत्परिचर्ययानगणितो येरेषनारायणः १.
नाथेश्रीपुरुषोत्तमेत्रिजगतामेकाधिपेचेतसा सेव्येस्वस्यपदस्यदातरिसुरेनारायणेतिष्ठ
ति । ३६

यं कंचित्पुरुषाधमं कतिपयग्रामेशमल्पार्थदं सेवायै मृगयामहे नरमहो मूढा वयं का
वयं ११॥ जन्मेदं वंध्यतां नीतं भवभोगोपलिप्सया काचमूल्येन विक्रीतो हन्त चिंतामणि
र्मया १२ यात्रामात्रमयत्नलभ्यमशनं वायुः कृतो वेधसा व्यालानां पशवस्तृणाङ्कु
रभुजः स्वस्थाः स्थलीशायिनः संसारार्णवलंघनक्षमधियां वृत्तिः कृता सा नृणां। याम
न्वेषयतां प्रयांति सततं सर्वे समाप्तिं गुणाः १३॥ यदुक्तं गृहरीक्षसेन धनिनां ब्रूषे न चा
टु मरसो नैषां गर्वगिरः शृणोषि न पुनः प्रत्याशया धावसि। काले बालतृणानि खादसि
सुखं निद्रासि निद्रागमे तन्मे ब्रूहि कुरङ्ग कुत्र भवता किं नाम तप्तं तपः १४ कांमवनेषु हरि
णास्तृणेन जीवन्त्ययत्नसुलभेन। विदधति धनिषु न दैन्यं ते खलु पशवो वयं सुधियः १५।
श्लाघ्यः स्वयमेव वच्मि महतीर्मर्मच्छिदो वेदना माभूत्कस्यचिदप्ययं परिभवो यासेति सं
सारिणः पश्य भ्रातरियं हि यो वनचराधिक्कारकेलिस्थली मानम्लानमसी गुणाब्धातिक
र प्रागल्भ्यगर्वच्युतिः १६ क्व गन्तासि भ्रातः कृतवसतयो यत्र धनिनः किमर्थं प्राणा

शांति श॰ प॰ ३७ 37

नोच्छ्रितिमनुविधानं कथमपि धनैर्याञ्चालब्धैर्नन परिभवोऽभ्यर्थनफलं निकारो
ऽग्रे पश्चाद्धनमहह भोस्तद्धि नियतं १७ प्राणानां वत किं तु वे कठिनतां तैरेव सा विश्रुता
निष्क्रामन्ति कथंचिदेव हि न ये याञ्चावचोभिः समं आत्मानं पुनराश्रिपामि विदितस्थै
र्योपि येषामहो मिथ्याशङ्कित तद्वियोगविधुरो यत्प्रार्थये सर्वथा॥ १८ अमीषां प्राणा
नां तुलितविसिनीपत्रपयसां कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितं यदीशाना
मग्रे द्रविणकणमोहान्धमनसां कृतं वीतव्रीडैर्निजगुणकथापातकमपि १९ वीभ
त्सा विषया जुगुप्सिततमः कायो वयो गत्वरं सर्वैर्बंधुभिरध्वनीव पथिकैर्योगे वियोगा
वहः हातव्योयमसार एष विरसः संसार इत्यादिकं सर्वस्य । एव हि वाचितेन तस्य पुनः
कस्यापि पुण्यात्मनः २०। तडिन्मालालोलं प्रतिविरतिदत्तान्धतमसं भवे सौख्यं हित्वा
श्रामहाव्यमपाथेयमनघं इति व्यक्तोङ्कारं चटुलवचसः शून्यमनसो वयं वीतव्रीडाः
शुकइव पठामः परममी २१ यदासौ दुर्वारः प्रसरति मदश्चित्तकरिणः तदा तस्योद्दाम ३७

प्रसरसमहृदैर्भैक्षवसितिः क्वतत्यैर्यीलानं क्वचनिजकुलाचारनिगडः क्वसालज्जारज्जुः
क्वविनयकगोराङ्कुशमपि २२ भित्ताणंनभवनमायतनैकदेशः शय्याभुवः परिजनोनि
जदेहभावः वासश्च जीर्णपटखंडनिबद्धकन्था हाहातथापिविषयान्नजहातिचेतः २३
त्वामुदरसाधुमन्येशाकैरपि यदसिलब्धपरितोषं हतहृदयंह्यधिकाधिकवाञ्छाशत
दुर्भरं न पुनः ॥२४॥ भुक्तंपात्रंपात्रीपरिणतिरमेध्यप्रचयभूः स्वयंभूतावासोविमृशकिय
तीयातिनदशां तदस्मिन्पौराणांत्रणामपिकिमास्यात्तमनुचितं स्वलीकारः कोयंयदहम
हमेवेतिरभसः ।२५। रतः प्राप्तेनितयोरियंपरिणतिर्यद्धर्मतत्त्वाभवत् स्वत्सोरास्पदमास्र
योगुरुश्चचारोगस्यविश्रामभूः जानन्नप्यवशीविवेकविरहान्मज्जन्नविद्याम्बुधौ श्रृङ्खी
रोयतिपुत्रकाम्यतिवतदेवीयतिस्त्रीयति २६ कैनद्वक्त्रारविन्दंक्वतदधरमधुक्वायतास्ते
कटाक्षाः क्वालापाःकोमलास्ते क्वचमदनधनुर्भङ्गुरोभ्रूविलासः इत्थंखट्वाङ्गकोटौप्र
कटितदशनंमञ्जुगुञ्जत्समीरं रागान्धानामिवोच्चैरुपहसतिमहामोहजालंकपालं २७॥

शांति॰ श्रेष्टं हृदयरहस्यं यत्प्रशान्तमुनीनां नखलु नखलु योषित्सन्निधिः सन्निधेयः। हर
शा॰ तिहि हरिणाक्षी दिक्षिप्रमदित्तुरप्र। प्रहतशमतनुत्रं चित्तमप्युत्तमानां ॥२८॥ स्मा
३८ श्लिष्यत्युच्चैर्घनपिशितपिंडं स्तनधिया मुखंलालाक्लिन्नं पिबति चषकं सासवमिव।
३८ अमेध्यप्लेक्लेदार्द्रे पथि च रमते स्पर्शरसिको महामोहान्धानां किमपि रमणीयं न भवति ॥ २९

॥ इति शांतिशतके परीतापोपशमो नाम प्रथमः परिच्छेदः १॥

अयमविचारितचारुतया संसारो भाति रमणीयः। अत्र पुनः परमार्थदृशा न किमपि
सारमणीयः १ कोनाप्यनर्थरुचिना कपटं प्रयुक्तं यत्तत्सुहृत्तनयबंधुमयं विचित्रं।
कस्यात्र कः परिजनः स्वजनो जनो वा स्वप्नेंद्रजालसदृशः खलु जीवलोकः ॥२॥ आरम्भः
संशयानामविनयभवनं पत्तनं साहसानां दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्यया
नां दुस्त्याज्यं यन्महद्भिः स्मरनरवृषभैः सर्वमायाकरण्डं स्त्रीरूपं केन लोके विषममृतमयं
धर्मनाशाय सृष्टं ३ यदा प्रकृत्यैव जनस्य रागिणो भृशं प्रदीप्तो हृदि मन्मथानलः तदात्र ३८

भूयः किमनर्थपरिपातैः कुकाव्यहव्याहृतयोनिवेशिताः ४ इथति तावदमी विषयाः सुखं
स्फुरति यावदियं हृदि मूढता मनसि तत्त्वविदां तु विवेचके क्व विषयाः क्व सुखं क्व परिग्रहः ।५।
यदा पूर्वं नासीदुपरि च न तथा नैव भविता तदा मध्यावस्थाक्षणपरिचयो भूतनिचयः अतः संयो
गेऽस्मिन् परिणतिवियोगे च सहजे किमाधारप्रेमाः किमधिकरणाः सन्तु च शुचः ६ इदंस्या
सृग्विण्मूत्रकरङ्कस्य च सुखं वेत्तु दुःखं च नास्त्यन्तरं स्वेच्छाकल्पनयानयोः खलसुथापि शाचकाम्याशनं ।
रम्भा चाशुचिमूत्रकरम्भपरमप्रेमास्पदं मन्मथः सङ्ग्रामोऽपि समः स्वकर्ममतिभिश्रान्तोऽन्यभावः समः ॥ ७॥
कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं निरुपमरसप्रीत्या खादन्नरास्थि निरामिषं सुरप
तिमिव पार्श्वस्थं श्वा सशङ्कितमीक्षते गणयति न हि क्षुद्रो लोकः परिग्रहफल्गुतां ८ अमीषां
जन्तूनां कतिपयनमेषस्थितिजुषां वियोगे धीराणां क इह परितापस्य विषयः क्षणादुत्पद्यन्ते
विलयमपि यान्ति क्षणममी नकेऽपिस्यातारः सुरगिरिपयोधिप्रभृतयः ९ पुत्रः स्यादिति दुः
खितः सति सुते तस्यामयेदुःखितः तद्दुःखादिकमार्जने नदनये तन्मूर्खता दुःखितः । जातश्चेत्

सगुणोऽयतन्मृतिभयंतस्मिन्मृतेदुःखितः पुत्रव्याजमपायगतोरिपुरयंमाकस्यचिज्जायतां ।१०।
स्थिरापायःकायःप्रणयिषुसुखंस्थैर्यविमुखं महाभोगारोगाःकुवलयदृशःसर्पसदृशः।
महावेश्माक्लेशःप्रकृतिचपलाश्रीरपितथा यमःस्वैरीवैरीतदपिनहितंकर्मविहितं ।।११।।
स्वल्पंप्राणविनाशसंशयकरींप्राप्यापदंदुस्तरां प्रत्याशांत्रभयंनवेत्तिविभवंस्वंजीवितंका
ङ्क्षति उत्तीर्णस्तुततोधनार्थमपरांभूयोविशत्यापदं प्राणानांचधनस्यचाधमधियामन्योन्यभा
वःपणः।१२। तिमलमतिभिःकैरप्यजस्रंजगज्जनितं पुराविधृतमपरैर्दत्तंचान्यैर्विजित्य
तृणंयथा। इहहिभुवनान्यन्येवीराश्चतुर्दशभुञ्जते। कतिपयपुरस्वाम्येपुंसांकएषम
दज्वरः।।१३।। रम्यंहर्म्यतलंनकिंवसतयेश्राव्यंनगीतादिकं किंवाप्राणसमासमागमसुखं
नैवाधिकप्रीतये। किन्तुभ्रान्तपतत्पतङ्गपवनव्यालोलदीपाङ्कुरच्छायाचंचलमाकल
य्यसकलंसन्तोवनान्तंगताः।।१४।। आम्लामकंटकमिदंवसुधाधिपत्यं त्रैलोक्यराज्यमपि
नच्चतृणायमन्ये। निःशंकससमदहरिणीकुलसङ्कुलासु चेतःपरंवलितशैलवनस्थलीषु।।१५।।

हरिणचरणक्षुण्णोपान्ताः सशाद्वलनिर्झराः कुसुमशबलैर्विष्वग्वातैस्तरंगितपादपाः।
विविधविहगश्रेणीचित्रध्वनिप्रतिनादिता मनसि नमुदं केषां दद्युः शिवा वनभूमयः १६॥
ते तीक्ष्णदुर्जननिकारशरैः शभिन्ना। धीरास्तपश्शमसौख्यभुजस्तएव। सीमंतिनीभुजलता
गहनं सुदस्य। येवञ्चिताः शमफलेषु तपोवनेषु १७। आरब्धाः कल्याणप्रतिविदयमारो
ग्यमटवि। श्रयंति स्नेमं तेपुलिनकुशलं भद्रमपलाः निशांतात्स्वन्नान्कथमपि विनिष्क्रान्त
मधुना मनोऽस्माकं दीर्घामभिलषति युष्मत्परिचितिं १८ वासो वल्कलमास्तरः किशलयान्यो
कस्तरूणां तलं मूलानि क्षतये क्षुधां गिरिणदीतोयं तृषाशांतये क्रीडामुग्धमृगैर्वयांसि
सुहृदो नक्तं प्रदीपः शशी स्वाधीने विभवे तथापि कृपणा याचन्त इत्यद्भुतं १९ शय्या शाद्वल
मासनं शुचि शिला सद्म द्रुमाणामधः शीतं निर्झरवारि पानमशनं कंदः सहाया मृगाः। इत्यप्रा
र्थितसर्वलभ्यविभवे दोषोऽयमेको वने दुष्प्राप्यार्थिनि यत्परार्थघटना यत्नैर्विना स्थीयते॥ २०॥
पूरयित्वार्थिनामाशां प्रियं कृत्वा द्विषामपि। पारं गत्वा श्रुतानां यस्य धन्या वनमुपासते ॥२१॥
आहारः फलमूलमात्ररचितं शय्या माही वल्कलं संवीनायपरिच्छदः कुशसमित्पुष्पाणि

शांति॰ पुत्रा मृगाः यस्तान्ताश्रयदानभोगविभवा निर्यन्त्रणाः शाखिनो। भिक्षाणीत्यधिकं गृहेषु
श॰ गृहिणां किं नाम दुःखावहं ॥२२॥ विवेकः किं सोपि स्वरसजनितो यत्र न कृपा सकिं योगो
४॰ यस्मिन्न भवति परानुग्रहरसः सकिं धर्मो यत्र स्फुरति न परद्रोहविरतिः श्रुतं किं तद्वा
५० स्यादुपशमफलं यन्न भवति ।२३ अयेकस्यचिदस्ति कश्चिदमितः केनापि दृष्टे हतः।
संसारः शिशुभावयौवनजराभारावतारादयं बालस्त्वं बहुमन्यतामकलं भ प्राप्य युवा
सेवतां। वृद्धस्तु विषयान्हिहिक्कुतरेव व्याहत्य किं पश्यति ।२४। पुत्रदारादिसंसारः
पुंसां संमूढचेतसां विदुषां शास्त्रसंसारः सद्योगाभ्यासविघ्नकृत् २५ सार्वभौमभ
वनं वनवासो निःस्वभावभवभावनयाते वालिशा हि विषयेंद्रियचौरैर् मुच्यते स्व
भवनेच वनेच ।२६। स्थूलप्रावरणोतिपूर्वकथकः काशाश्रुलालाविलीं। भग्नोरुः क
टिपृष्ठजानुदशनो मुग्धोऽतिथीन्वारयन् श्वस्वन्पृष्टवधूवचांसि पतुषा संत्रास
यन्वायसान् आशापाशनिबद्धजीवविभवा वृद्धा गृहे ग्लायति ।२७। वनेषु दोषाः
प्रभवंति रागिणां गृहेषु पंचेंद्रियनिग्रहस्तपः अकुत्सिते कर्मणि यः प्रवर्तते। ४॰

निवृत्तरागस्यगृहंतपोवनं ॥२८॥ इति शांतिशतके विवेकोदयोनामद्वितीयःपरिच्छेदः॥ २॥
ॐम् ॥ महतापुण्यपण्येनक्रीतेयंकायनौस्त्वया। पारंदुःखोदधेर्गंतुं
त्वरया यन्नभिद्यते ।१। दिवसरजनीकूलच्छेदैःपतद्भिरनारतं वहति निकटे कालः
स्रोतःसमस्तभयावहं इहहिपततांनास्त्यालम्बोनचापिनिवर्तनं तदिह महतांकोयं
मोहोयंयदेषमहाविलः।२। अवश्यंयातारश्चिरतरमुषित्वापिविषया वियोगेकोभे
दस्त्यजतिनजनोयत्स्वयमिमान् व्रजन्तःस्वातंत्र्यात्परमपरितापायमनसः स्वयं
मुक्ताह्येतेशमसुखमनन्तंविदधति।३। भवारण्यंभीमंतनुगृहमिदंछिद्रबहुलं। बली
कालश्चौरोनियतमसितामोहरजनी। गृहीत्वाज्ञानासिंविरतिफलकंशीलकवचं।
समाधानंकृत्वास्थिरतरदृशोजागृतजनाः।४। गृहेपर्यन्तस्थेद्विविधकरणग्रामोषंश्रुतव
ता खवेश्मान्तारत्नाक्रियनरतिमार्गोऽयमुचितः नवान्गेहात्गेहात्प्रतिदिवसमा
कृष्यनयतः कृतान्तात्किंशङ्कानहिभवतिरेजागृतजनाः।५। केऽप्ययंनोवयमितिच

शांति
श.
४१
४१

वयः केभवामो भवाब्धौ कर्मोर्मीणां विषमवलनैः फेणवत् पुंजिताः स्मः । तद्देपीयः
स्त्वयि गोविषयेच्चित्तमाधाय प्रज्ञाः सर्वारम्भैर्लगन जगतामन्तरात्मन्यनन्ते ।६। सूक्तिं
कर्णस्वधां अनन्तुक्तमञ्जनं स्तस्मिन्नमोदामहे । ब्रूतां वाच महत्यकोविषमुचं तस्मिन्न खिद्या
महे । यायस्य प्रकृतिः सतां विनन्तुं ता किं न सायाजायते कर्मस्सन्तु खलकर्मजन्मनिगड
च्छेदाय यज्जायते ।७। मन्निन्दया यदि जनः परितोषमेति । नन्वप्रयत्नसुलभोऽयमनुग्र
हो मे श्रेयोर्थिनो हि पुरुषाः परतुष्टिहेतु दुःखार्जितान्यपि धनानि परित्यजंति ॥८॥
स्वधर्मपीडामहायया ऽयं मत्पापशुद्ध्यर्थमिह प्रवृत्तः नचेत् तत्त्वमामसत्यहस्यकुर्यां ।
मत्तः क्षतज्ञोवदकीदृशोऽन्यः ९ कश्चित् पुमान् क्षिपति मां प्रति रूक्षवाक्यैः सोहं त्वमा
भवनमेत्य मदं प्रयामि । शोकं व्रजामि पुनरेवमयं तपस्वी चारित्रतः स्खलितवान्निति म
न्निमित्तं ।१०। आत्मा त्वमन्यवधीयतां गृहवसां द्वेरागमाथीयतां बन्धुभ्योऽप्यवधीयतां गृहव
सांद्वैरागमाथीयतां । भिन्नार्थमवसीयतां प्रतिदिनं सत्कर्म संचीयतां कोपश्चेतसि

हीयतां परतरं ब्रह्मानुसंधीयतां ॥११॥ यत्नं शान्तिः समये प्रवृत्तिः शिवशिवेत्युक्तौ मनोनिर्वृतिर्।
भेदे चाभिरुचिर्धनेषु विरतिः प्राप्तात्ममायोरतिः । एकान्ते वसतिर्गुरौ प्रतिनतिः सद्भिः
समं संगतिः सत्वे प्रीतिरनङ्गनिर्जितिरसौ सन्मुक्तिमार्गे स्थितिः ॥१२॥ सम्भोगाद्विषयाभि
षक्तपरीतस्मैनित्यमलाखिल ज्ञानोन्मेषनयात्कथं नवभवविदात्मा स्वदेहे हिनः । स्वाध्यं न
ह्वि नदेवमाधनमितो व्याहृत्तिरेवाभिधान् नस्याज्योतिहपेतिं यत्नमिदं दोषत्रयं पश्यति ॥१३॥
वुद्ध्युरगोचरतया न गिरां प्रचारो दूरे गुरुप्रथितवस्तुकथावतारः । तत्वक्रमेणाविदुषा करु
णावदाते श्रद्धावतां हृदि पदं स्वयमादधाति ॥१४॥ दुःखोग्राग्रकतीव्रः संसारोऽयमहान
सो गहनः । इह विषयामिषलालस मानसमार्जार मा निपत ॥१५॥ अरे चेतो मीन भ्रमण
मधुना यौवनजले त्यजत्वं स्वच्छन्दं युवतिजलधौ पश्यसि न किं । तनूजालीजालं स्तनयु
गलं तुम्बीफलयुतं मनोभूः कैवर्तः क्षिपति परितस्त्वां प्रति मुहुः ॥१६॥ विषयविषधराणां
दोषदंष्ट्रोत्कराणां विषयविषविमर्दव्यक्तदुःखप्रतिष्ठितानां । विरम विरम चेतः सन्निधानाद्

शांति॰ मोघा। सखे करणामपि नाहो साहसं साम्यकार्यौः १७। एकीभूयस्फुटमिवकिमप्याचर
शा॰ द्भिः प्रलीनैर्। एभिर्भूतैःस्मरकतिकृताःस्वान्तेनविप्रलम्भाः तस्मादेषांत्यजपरिचयं
५२ चिंतयन्स्वस्वभावस्याम्। आभाषस्तेकिमुनविदितःखण्डितःपण्डितःस्यात् ॥१८॥ धूर्तै:
42 रिन्द्रियनामभिःप्रणयितामापादयद्भिः स्वयं। सम्भोक्तविषयानयंकिलशुमान्
मोक्षाशयावंचितः तैःपोषितनतस्वत्यतामुपगतैरौदास्यमालम्बितं। संप्रत्येषविधे
र्नियोगवशगःकर्मांतरैर्वध्यते॥१९। देवेसमर्प्यचिरसंचितमोहजालं। स्वस्थास्सुखंवसत
किंपरयाचनाभिः। मेरुंप्रदक्षिणयतोऽपिदिवाकरस्य तेनस्यसप्ततुरगानकदाचिद्दृष्टौ॥२०॥
आकाशमुत्पततुगच्छतुवादिगंतम् अम्भोनिधिंविशतुतिष्ठतुवायथेष्टं। जन्मांतरार्जित
शुभाशुभकृन्नराणां छायेवनत्यजतिकर्मफलानुबंधः॥२१॥ उपशमफलाद्विद्यावीजा
त्फलांतरमिच्छतां भवति विफलोयतत्प्रारम्भस्तदत्रकिमद्भुतं नियतविषयाह्येतेभावा
नयांतिविपर्ययं जनयति यतःशालेर्वीजं नजातुयवांकुरं २२ यदेतेनसाधूनास्तुपरि विमु
५२

त्वाः सन्निथनिनो नचैषावज्ञैषामपितृनिजविनठायभयं। अतः खेदो नास्मिन् परममनु
कंपैवभवति स्वमांसन्न स्तिभ्यः कश्चहरिरोभ्यः परिभवः ॥२३॥ तस्मादनंतमजरं परमं वि
काशि तत्त्वसंवांकृतवृथायदिचेतनास्ति यस्यानुषङ्ग इमे भुवनाधिपत्यभोगादयः स्त
यिणएवसतांविभान्ति ॥२४॥ इति शान्तिशतके कर्तव्योपदेशो नाम तृतीयः परिच्छेदः॥
ओम् ॥ लक्ष्मीर्निर्हृतिमितिहीनचरितैर्धैर्यैर्देवतन्त्रिस्तया
किंनाथेवकरोमिनाम नृचरीरामांसकामामिव ब्रह्माण्डे निपतत्यपि स्खलति न प्रायेण येषां
मनाङ् तेषांसार्थमनस्विनामनुपदंगन्तास्मिनाहंयदि ॥१॥ लब्धाः श्रियः सकलकामदुघास्ततः
किं संतर्पिताः प्रणयिनोविभवैस्ततः किं। न्यस्तं पदं शिरसि विद्विषतां ततः किं कल्पं स्थितं
तनुभृतां तनुभिस्ततः किं ॥२॥ निष्कन्दाः किमु कन्दरोदरभुवः क्षीणास्तरूणां त्वचः किं शुष्काः
सरितः स्फुरद्भिरिगुरुग्रावस्खलद्वीचयः। प्रत्युत्थानमितस्ततः प्रतिदिनं कुर्वद्भिरुद्ग्रीवि
भिर् यद्द्वारार्पितदृष्टिभिः क्षितिभुजां विद्वद्भिरध्यास्यते ॥३॥ कामं जीर्णपलाशसंहतिकृतां

शांति॰ कन्थावसानोऽवने कुर्यामम्नुभिरप्ययाचितमुखैः प्राणानुबंधस्थितिं। साङ्गग्ला
श॰ निमवेपितं सचकितं स्वांतर्निदाघज्वरं वक्तुं नत्वहमुत्सहे सकृपणं देहीतिदीनं वचः ॥४॥
४२ सत्यंवक्त्रमशेषमस्तिसलभावाणीमनोहारिणी दानं दानवशंशरणमभयं स्वच्छं
43 पित्तभ्यो जलं। शृङ्गार्थं परमेश्वरस्य विमलः स्वाध्याययज्ञः परं द्वह्याधेः फलमूलमस्ति
श्रमणं क्लेशात्मकैः किं धनैः ॥५॥ सन्ति स्वादुफलावनेषु तरवः स्वच्छंपयोनिर्झरे वासो
वल्कलमाश्रयो गिरिगुहाशय्यालतावल्लरी। आलोकाय निशासुचंद्रकिरणाः सख्यंकुरं
गैःसह स्वाधीनेविभवेप्यहो नरपतिंसेवन्त इत्यद्भुतं ॥६॥ पाणिः पात्रंपवित्रंभ्रमणप
रिगतंभैक्ष्यमक्षय्यमन्नं वस्त्रंविस्तीर्णमाशादशकममलिनं तल्पमस्वल्पमुर्वी। येषांनिः
सङ्गताङ्गीकरणपरिचितिः स्वांतसंतोषिणस्ते धन्याः सन्यस्तदैन्यव्यतिकरनिकराः
कर्मनिर्मूलयंति ॥७॥ महाशय्याभूमिर्मसृणमुपधानंभुजलता वितानंचाकाशंव्यज
नमनुकूलोऽयमनिलः। स्फुरच्चंद्रोदीपः स्वधृतिवनितासङ्गमुदितः सुखंशांतःशेते

विगतभवभीतिरन्तपश्व ॥८॥ धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी सत्यं
सूनुरयं यदा च भगिनी भ्राता मनःसंयमः शय्याभूमितलं दिशोपि वसनं ज्ञानामृतं भोजनं।
यस्यैते हि कुटुम्बिनो वद सखे कस्मात् भयं योगिनः ॥९॥ धिक् धिक् तान् कृमिनिविशेषव
पुषः स्मुर्जन्महास्तिद्वयो निष्पन्दीकृतशांतयोपि च नमः कारागृहे ब्बासते। तं विद्वांसमिह
स्तुमः करपुटीभिक्षान्नशाकेपि वा वालावक्त्रसरोजिनीमपुनिवायस्याविशेषावशः ॥१०॥
मातर्लक्ष्मि भजस्व किंचिदपरं मत्कांक्षिणी मा स्म भूः भोगेभ्यः स्पृहयालवस्तव वशाः कानि
स्पृहानामसि। सद्यः स्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृते भिक्षासक्तुभिरेव संप्रति वयं
वृत्तिं समीहामहे ॥११॥ जिह्वे लोचन नासिके श्रवणा हे त्वक्चापि न वार्यसे सर्वेभ्यस्तु नम
स्कृताञ्जलिरहं सप्रश्रयं प्रार्थये। युष्माकं यदिमं समं तदधुना नात्मानमिच्छामहे होन्त
भूमिभुजां निकारदहनज्वालाकराले गृहे ॥१२॥ गतः कालो यत्र प्रणयिनी माथि प्रेमकुटि
लः कदाक्षः कालिंदीलघुहरिद्भित्तिप्रभवति इदानीमस्माकं जठरकमठीपृष्ठकठिना

शांति॰ मनोवृत्तिस्तत्किं व्यसनिविमुखे वदापयसि ॥१३॥ यदासीदज्ञानं स्मरतिमिरसंस्कारजनि
श॰ तं तदा ज्ञातं नारीमयमिदमशेषं जगदपि । इदानीमस्माकं पटुतरविवेकाञ्जनजुषां
४४ समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥१४॥ गतः कालो यत्र द्विचरणपशूनां नादितिभुजां ।
पुरः स्वस्त्रीस्पृक्ता विषयरसमास्वादितमभूत् । इदानीमस्माकं तृणमिव समस्तं कल
यताम् अपेक्षा भिक्षायामपि किमपि चेतः स्पृहयति ॥१५॥ पूर्वं तावत् कुवलयदृशां लोल
लोलैरपाङ्गैः आकर्षद्भिः किमपि हृदयं पूजिता यौवनश्रीः । संप्रत्यन्तर्निहितसदसद्भाव
लब्धप्रबोध प्रत्याहारैर्विपदहृदये वर्तते कोपि भावः ॥१६॥ गङ्गातीरे हिमगिरिशिला
बद्धपद्मासनस्य ब्रह्मज्ञानाभ्यसनविधिना योगनिद्रां गतस्य । किं तैर्भाव्यं मम सुदिवसै
र्यत्र ते निर्विशङ्काः संप्राप्स्यन्ते जरठहरिणा गात्रकण्डूविनोदं ॥१७॥ कदा भिक्षाभक्तैः कर
कलितगङ्गाम्बुतरलैः शरीरं मे स्यात्स्वस्त्युपरतसमस्तेन्द्रियसुखं । कदा ब्रह्माभ्यासस्थिर
तनुतया रण्यविहगाः पतिष्यन्ति स्थाणुभ्रमहतधियः स्कन्धशिरसि ॥१८॥ रथ्यान्तश्चरत

४४

ल्पाश्रुतजरत्कंथाचलस्याध्वगैः सत्रासंचसकौतकंचसकृपंदृष्टस्यतैर्नागरैः। निर्व्याजी
कृतचित्सुधारसमुदानिद्रायमाणस्यमे निःशंकःकरटःकदाकरपुटीभिक्षांविलुण्ठिष्य
ति।१९। पणान्तीस्पृहया लतानकथमप्याप्तेविवेकोदयात् नित्यंप्रच्युतिशंकयाद्नाम
पि स्वर्गेनमोदामहे। अप्यप्येषुविनाशिवस्तुविषयाभोगेषुतस्मानमे स्वर्णाद्याःप्रलिने
पंहरिपदध्यानेमनोवांछति।।२०।। अपिवेदाश्चयोभावः स्वच्छोयंविश्वबुद्बुदः।
विनीतउदितोवेतिविकल्पपटलंमनः।।२१।। अहङ्कारःक्वापिव्रजवृजिनहेमात्वमिहभूर-
अभूमिर्दर्पाणामहममपरत्वंपिशुनहे। अरेक्रोधप्रख्यानानन्तरमनुसरानन्यमनसां त्रिलो
कीनाथोनोहृदिवसतुदेवोहरिरसौ।।२२।। मातर्मायेभगिनिकुमतेहेपितर्मोहजाल
ब्रावर्तध्वंभवतुभवतामेषदीर्घोवियोगः। सद्योलक्ष्मीरमणचरणाभ्रष्टगंगाप्रवाह
व्यामिश्रायां हृदादिपरमब्रह्मणिहर्षिर्भवामि २३ आदित्यस्यगतागतैरहरहःसंक्षीयते
जीवितं व्यापारैर्बहुकार्यकारणपतेःकालोपिनज्ञायते दृष्ट्वाजन्मजरावियोगमरणं

शांति॰ शमस्त्रोतोत्पद्यते पीत्वा मोहमयीं प्रमोदमदिरामुन्मत्तभूतं जगत् ॥२४॥ मातर्मेदिनि
श॰ तातमारुतसखे ज्योतिःसुबंधो जल भ्रातर्व्योमनिबद्धएषभवतामन्त्यप्रणामाञ्जलिः ।
४५ युष्मत्संगवशोपजातसुकृतोद्रेकस्फुरन्निर्मल ज्ञानापास्तसमस्तमोहमहिमा लीये
४५ परे ब्रह्मणि ॥२५॥ आशानाम नदी मनोरथजला तृष्णातरंगाकुला रागग्राहवती
वितर्कविहगा धैर्यद्रुमध्वंसिनी । मोहावर्तसुदुस्तराप्रकटितप्रोत्तुङ्गचिंतातटी तस्याः
पारगता विशुद्धमनसो नंदंति योगीश्वराः ॥२६॥ इति
शांतिशतके ब्रह्मप्राप्तिर्नाम चतुर्थः परिच्छेदः संपूर्णः ॥ ४॥

वृंदा ओम॥ नमस्तस्मै कस्मैचिदपि पुरुषायाद्भुतमहा महिम्ने विभ्राजत्कनकरुचि
वन धाम्ने स्वकृपया। असंकोचेनैव श्वपचमपि लेभे यः स्वयमहो ददौ यत्तद्भक्तिं विमलतर
श॰ नानारसमयीं ॥१॥ यस्मिन्न प्रविशेन्मनोपि महतां का तत्ववार्तापुनः शास्त्राणां त्वपि
तं च यद्भगवता भंगेव मत्तोद्भवे तद्वृंदावनमुन्मदेन रसिकद्वंद्वेन केनाप्यहो नित्यक्रीड

तयागृहीतमिहकेविधुर्नगौरप्रियाः ॥२॥ गुरोः सर्वैर्हीनोप्यहमखिलजीवाधमतमो प्यपे
षैर्दोषाग्रैरपिचवलितोदुर्मतिरपि । प्रमादान्मय्येवाविदमहह राधाव्रजपतेः कुमारश्री
वृंदावनमपिमगोरोमगगानि ॥३॥ श्रीवृंदावनकेलिरंग सहजं सौन्दर्यशोभावयो वैदग्ध्या
दिचमत्कृतेः परतरं विश्रांतिधामाद्भुतं नव्यं मोहनदिव्यनागरवरद्वंद्वमियोजीवनं गौर
श्यामलमुज्ज्वलोन्मदरसातिष्टं हृदिस्फुर्जतु ॥४॥ इह भ्रामं भ्रामं जगतिनहि गंधोपिकलितो
यदीयस्तत्रैवाखिलनिगमदुर्लक्ष्यसरणौ । अपारेश्रीवृंदावनमहिमपीयूषजलधौ महाश्च
र्यैन्मीनेमधुरिमनिचिंतंलगुतुमे ॥५॥ जयति जयनेवृन्दारण्यामुनसिन्यार अनुपममिव
सारं ग्रामवृदाकोटस्यकंग्ध्य खगमृगतरुवल्लीकुञ्जवापीतडाग स्थलगिरिहृदिनीनामद्भुतैः
सौभगाद्यैः ॥६॥ वृंदारण्येचरचरणादृक् पश्यवृन्दावनश्रीर् जिह्वे वृंदावनगुणगणान्
कीर्त्तयश्रोत्रदृष्टान् वृंदाटव्या भजपरिमलं घ्राणगात्रत्वमस्मिन् वृंदारण्येलुठपुलकितं
कृतस्य केलिस्थलेषु ॥७॥ महोज्ज्वलरसोन्मदप्रणयसिंधुनिःस्यंदिनी महामधुरराधिका

वृंदा
वनश०
४६

46

रमणखेलनानंदिनी। रसेन समधिष्ठिता भुवनवंद्यया वृंदया चकास्तु हृदि मे हरेः परमधाम
वृंदाटवी ॥८॥ जन्मनि जन्मनि वृंदावनभुवि वृंदारकेंद्रवंद्यायां। अपि तृणगुल्मकभावे
भवतु ममाशासमुल्लासः ॥९॥ हरिपदपङ्कजसत्स्वादनरसमनुभूय पूर्णोपि। यत्रोद्धव
आशास्ते तृणतां तन्नौमि राधिकाविपिनं ॥१०॥ राधावल्लभपादपल्लवजुषां सद्धर्मनीतायु
षां नित्यं सेवितवैष्णवांघ्रिरजसां वैराग्यजीवस्पृशां। हृत्तैकांतरसप्रविष्टमनसामप्यालि
यत्नूहरतस्तु तद्राधाकृष्णावलोकमचिराद्धि दत्ते वृंदावने ॥११॥ राधानंदकिशोरौ निरवधि
रससागरे मग्नौ। निजकेलिधामवृंदाविपिनमुदीक्ष्यैव सौख्यमाप्नुवतः ॥१२॥ उद्दामप्रेम
सोज्ज्वलैकरसया भक्त्या विधूतात्मना ते ध्यातं कस्यचिदेव चित्तमुद्भवेन्न तद्दिग्गाभोगवत्। यस्मिन्
दिव्यविचित्रकेलिमिथुनं तच्छ्यामगौरं दिवि ज्योत्स्नावत्परिचाययेत तदिह किं विन्देय वृंदा
वनं ॥१३॥ विशुद्धाद्वैतैकप्रणयरसपीयूषजलधेर् घनीभूतद्वीपे समुदयति वृन्दावनमहा।
मिथः प्रेमोद्घूर्णोद्भ्रमिकमिथुनक्रीडमनिशं न देवाद्यासीनं प्रविशति पदे क्वापि मधुरे ॥१४॥

नाहंवेद्मिकथंनुमाधवपदाम्भोजद्वयीध्यायते कावाश्रीशुकनारदाद्यकलितेमार्गेत्स्नुमेयो
गपता। नस्माद्दुर्घमभद्रमेवयदिनामात्तांममैकंपरं राधाकेलिनिकुंजमञ्जुलतरंवृंदावनं
जीवनं॥१५॥ यत्सीमानमपिस्पृशन्ननिगमोदूरात्परंलक्षते किंचिद्गूढतयाद्यदेवपरमान
न्दोत्सवैकावधिः। यन्माधुर्यकलोप्यवेदिनशिवस्तायम्भुवाद्यैरहं तद्वृंदावननामधाम
वसदंविंदामिराधापते॥१६॥ कदानुवृंदावनकुञ्जमण्डले भ्रमंभ्रमंहेमहरिन्मणिप्रभं।
संस्मृत्यसंस्मृत्यनदद्भुतप्रियं द्वयंद्वयंविस्मृतिमेतुमेखिलं॥१७॥ छिद्येतखड्गधारंदंयदिमेश
रीरं शोराविपद्भितचयोयदिवापतंति। हाहन्तहन्तनतथापिममेहभूयात् वृंदावना
दितरतीर्थपदेपियासा॥१८॥ स्वयंपतितपत्रकणामृतवतन्तधामद्वयन् सदामि
ह्रिरनंदिनीशुचिपयोञ्जलीभिःपिबन्। कदामधुरराधिकारमणरासकेलिस्थलिं
विलोकयन्ममयोवधिमधिवसामिवृंदावनं॥१९॥ भूमिर्यत्रसकोमलाबहुविधप्रद्योतिर
त्नच्छटा नानाचित्रमनोहरंखगमृगाद्याश्चर्यरागान्वितं। वल्लीभूरुहजातयोद्भुततमा

वृंदा॰ यत्रप्रधानादिभिस् तन्मेमनंदकिशोरकेलिभवनं वृंदावनंजीवनं ॥२०॥ साक्षादिवास्ते
शत॰ पुरुषोत्तमांघ्रि सेवारसादाप्यधिकोरसौघः। स्पन्देतवृन्दाविपिनेप्यहष्टो राध्याप्रियो
५८ योभुवनस्यसाक्षी ॥२१॥ नागारितिद्रुतुभिरवःपरमोत्ररापा वृंदावनं वनमतिप्रकटंपुराणा।
47 तस्याविधेयममभोङ्गमहानुरागा मूर्तैस्तदङ्घ्रि नमत्पहोप्रत्यहरिंकापशेप ॥२२॥ मिलन्तु
चिंतामणिकोटिकोटयः स्वयंवहिर्दृष्टिमुपैतवाहरिः तथापिवृंदावनधूलिधूसरं न
देहमन्यत्रकदापियातमे॥२३॥ कृपयतुमयिवृंदारण्यराजोमनाग प्यतिवहनकृपोरु
स्नेहभावादुदिक्षुः फलतुतदनुकम्पाकल्पवल्लीफलंत्वद प्रभवतुवसतिर्मेतत्प्रिया
रामसीम्नि॥२४॥ तेनाकारिसमस्तपवमगवद्धर्मोपितेनाद्भुतः सर्वस्मात्पुरुषार्थतोपि
परमःकश्चित्करस्थीकृतः। तेनापायिसमस्तमर्द्दनिपदंब्रह्मादयस्तंनमन्त्य श्रीदेहा
तमधारियेनवसतौवृन्दावनेनिश्चयः ॥२५॥ पुलिनेपुलिनेकलिंदजाया विरतापि
तलेतलेतरूणां। घणीभूतसौख्यकन्दंवृंदाविपिनै हन्तकदादिनानिनेष्ये ॥२६॥

गौरश्यामलमिथुनं खेलति कंदर्पलीलया यत्र। राधामाधवनाम्नाप्रथितं नैत्रौमि
काननं किमपि ॥२७॥ खगमृगद्रुमवल्ली हृन्मन्मदप्रेम्णा। श्रीराधयदमृतरसे
न ध्यातं वृन्दावनं नमत ॥२८॥ उषरमपिहरिभक्तेर् नानाद्रुमार्गनिष्टमप्यधमं।
वृंदाविपिनमचिंत्य प्रभावमुन्मादये प्रेम्णा ॥२९॥ भक्तेकयान्यत्र हता तीर्थमानिनो धी
रा स्लदे तन्न वयं विदाम: श्रीराधिकामाधववल्लभं न: परं तु वृंदावनमेव संश्रय: ॥३०॥
दोषाकरोहं गुणलेशहीन: सर्वाधमो दुर्लभवस्तुकांक्षी। वृंदाटवीमुज्वलभक्तिसार
बीजं कदा प्राप्य भवामि हर्षी: ॥३१॥ शुद्धोज्वलप्रेमरसामृताब्धेर् अनंतपारस्य किशुद्धरं।
राधाभिधाय प्रचकास्ति सारं तदेव वृंदाविपिनं गतिर्मे ॥३२॥ सर्वसाधनहीनोपि वृंदारण्य
कंसंश्रय:। य: कोपि प्राप्नुयादेव राधाप्रियरसोत्सवं ॥३३॥ त्यजन्तु स्वजना: कामं देहवृत्ती
श्चमाप्नुवन्। न वृन्दावनसीमात: पदं मे चलतु क्वचित् ॥३४॥ सा मे न माता स च मे पिता
न स मे न बंधु: न च मे सखा न। स मे न मित्रं स च मे गुरुर्न न यो मे न वृंदावनवासमादिशेत्
॥३५॥

वृंदा॰ वन॰ श॰ ४८

48

तच्छ्रोतृत्वं मम कर्णमूलमपि न स्वप्नेऽपि यायादहो श्रीवृंदाविपिनस्य यत्र महिमा नात्यद्भुतः
श्रूयेत। तेमे दृष्टिपथं न यांतु नितरां सम्भाष्यतां मा मुहुर् ये वृंदावनवैभवश्रुतिगते नोल्लासि
नो नाखिलाः॥२६॥ अलमलमिह योषिज्जर्दभीमङ्गरंगैः अलमलमिह वित्तापत्यविद्या
यशोभिः। अलमलमिह नानासाधनायासदुःखैः भवत भवत वृंदारण्यमाश्रित्य धन्याः॥ २७॥
वैकुंठं कोटिकोटिप्रगुणितमपि नो यत्र जालेशमात्रां प्राप्नोति लक्ष्मीर्भगाढ्यैर्लवमपि लभते
सुद्भावोज्ज्वलायाः। कुर्वीरन् भक्तिकोटीर्भगवति न तथाप्यद्भुतप्रेममूर्तेः श्रीराधाया
अभक्तैः किमपि न कलितां नौमि वृंदाटवीं तां २८॥ इदमपि भविता किं यत्र कुत्रापि वृंदा।
पदमपि मम जातं श्रोत्रवीथीमकस्मात्। मधुरमधुरणाथामाधवानन्दखेला वनमु
पनयदंतर्दीप्यतिप्रेममूर्छी।२९॥ कदा नु वृंदावनवीथिकासु दृढं परिभ्रमन् श्यामलगौ
रमद्भुतं। किशोरमूर्तिद्वयमेकजीवनं पुरस्फुरद्वीक्ष्य पतामि मूर्छितः॥३०॥ किमेतादृ
ग्भाग्यं मम कलुषमूर्तेरपि भवेत् निवासो देहांतावधि यदिह वृंदावनभुवि। तयोः श्रीदम

त्योर् नवनवविलासैर्विहरतोः यदज्योतिः स्फुरेदपि व मम सगोपि भविना ॥४१॥ मूर्तं स्थावर
जंगमात्मकमहो यत्र प्रविष्टं किमप्य् आनंदैकघनाद्भुतं निजमहस्सा नित्योत्सवं भासते ।
मायाच्छीकृतदृष्टिभिस्तु कलितं नानाविरूपात्मना तद्वृंदाविपिनं कदाधिवसतः
स्यान्मे तनुश्चिन्मयी ।४२॥ यत्रप्रविष्टः सकलोपि जंतुः सर्वः पदार्थोप्यवधेरदृश्यः स्वानंद
सच्चितघनत्वमेति तदेव वृंदावनमाश्रयंतु ॥४३॥ वृंदावनस्थेष्वपि ये त्र दोषान् आरोपयंति स्थि
रजंगमेषु । आनंदमूर्तिष्वपराधिनस्ते श्रीराधिकामाधवयोः कथं स्युः ॥४४॥ ये वृंदावनवासि
निंदनरता ये वा न वृंदावनं ध्यायन्ते न लयंति ये च कुधियः केनापि वृंदावनं । ये वृंदावनमत्र
नित्यसत्त्वचिद्रूपं सहन्ते न वा तैः पापिष्ठनराधमैरनभवत्स्वप्नेपि मे सङ्गतिः ॥४५॥ असत्य
बहुवचो यदिह वदति सात्त्वान्मम श्रियं बलादपि हरति चेत् प्रियसुतादिकं घ्नति वा । धना
न्यपि च जीवनं यदि हरंति वृंदावनस्थितानाम् तदपि ते प्रिया मम भवंति वंद्याः परं ॥४६॥ परस्व
हा ये कदशनमपि नित्यं परवधू प्रसक्तं विश्वेषामहह वहुधा सिंहकमपि । दुराचारं लोभादप

वृंदा॰ हतमपिभ्रातरहह दिवांधस्त्वंवृंदावनगतजनंनावगणयेः ॥४७॥ परधनपरदारद्वे
श॰ षमात्सर्यलोभान्नतपरुषपराभिद्रोहमिथ्याभिलापान्। त्यजतियइह भक्तोराधिका
४९ प्राणनाथे नखलुभवति बंध्यानस्यवृंदावनाशा ॥४८॥ कुरुसकलमधर्मंमुंचसर्वंस्वध
५१ र्मं त्यजगुरुमपिवृंदारण्यवासानुरोधात्। सनवपरमधर्मः साचभक्तिर्गुरूणां सकिल
कलुषराशिर्यद्विवासान्तरायः ४९ निर्मर्यादाश्चर्यकारुण्यपूर्णौ राधाकृष्णौयस्यपा
श्वेत्कदाचित्। यःकोप्यस्मिन्यादृशस्तादृशोवा देहस्यान्तेप्राप्नुयादेवसिद्धिं ॥५०॥ राधा
मधुपतिपादाम्बुज भक्ताद्दूरमुक्तस्य अजितेंद्रियस्यकृपया मम वृंदारण्यमाश्रयोभवतु ५१॥
राधामाधवपादपंकजरजः प्रेमोन्मदैतत्प्रिय क्रीडाकाननवासिषुस्थिरचरप्राणिष्वपि
द्रोहिषु प्रद्वेषं परमापराधमहहत्यक्तैतैरप्यधैर् युक्तोप्यामरणान्नलब्धवसतिर्
वृंदावनेस्यात्कृती ॥५२॥ नलोकवेदोद्धृतमार्गभेदैर् आविश्यसंक्लिश्यतरेविमूढाः।
हठेनसर्वंपरिहृत्यवृंदा वनान्तरेपर्णकुटीकुरुध्वं ॥५३॥ यतहृल्लकंतुधास्त्राण्यपहह ४९

जनतया गृह्यतां यत्नदेव स्वं स्वं यत्नन्मतेष्यापयत्नलघुमतिस्तर्कमात्रे प्रवीणाः। अ
स्माकं तूज्वलैकोन्मदविमलरसप्रेमपीयूषमूर्तेः श्रीराधायाविहाराटविमिह नविना
न्यत्रनिर्यातिचेतः ॥५४॥ स्निग्धश्यामाभिरामच्छविमृदुमसृणो तत्महे मावदातं ज्योति
र्द्वन्द्वं किशोराकृतिमधुरमहोघूर्णिमानं रसेन। नित्यं यत्रैव खेलायतिमदनकलाकौतुके
नात्युदारं सारं सारात्सुशेषादपि तदशदिशः श्रीः वृंदावनं नः ॥५५॥ अपारकरुणाकरं व्र
जविलासिनीनागरं मुहुः सुबहुकाकुभिर्नतिभिरेतदभ्यर्थये। अनर्गलवहन्महाप्रण
यसीधुसिन्धौ मम क्वचिन्नतु विजायतां रतिरिहैव वृन्दावने ॥५६॥ नानामार्गरतोपि
दुर्मतिरपि त्यक्तस्वधर्मोपि हि स्वच्छन्दाचरितोपि दूरभगवत्सम्बंधगंधोपि च। कुर्वन्न यत्र
चकामलोभवशतो वासं समस्तोत्तमं यायादेव रसात्मकं परमहं तन्नौमि वृंदावनं ॥५७॥
इह सकलसुवैभवः स्मृतं मम भक्तिसौख्यं तदपि चरमकाष्ठां सम्यगाप्नोति यत्र। तदिह पर
मं पुंसो धाम वृंदावनाख्यं निखिलनिगमगूढं मूढबुद्धिर्न वेद ॥५८॥ भजन्तमपि देवता

वृंदाव. न्तरमथान्तरब्रह्मणोप्यचिंत्यं पशुवदेववाविषयभोगमात्रेरतं। अचिंत्यनिजशक्ति
प्राम. तः स्वगतराधिकामाधव प्रगाढरसदुर्मदं कुरुतपवृंदावनं ॥५९॥ यत्कोंप्यप्राम
५. पिस्पृशेत्र निगमोयन्नोविदुर्योगिनः श्रीशब्रह्मशुकार्जुनोद्धवमुखाः पश्यंति यन्न
50 क्वचित् अग्रपत्किंव्रजवासिनामपिनयत् दृश्यंकदालोकये तद्वृंदावनरूपमद्भुत
महं राधापदैकाश्रयः ॥६०॥ विस्मृत्यदेत्यमांत्रप्रणयमयमहोज्योतिरेकार्णवान्तः
श्रीवृंदारण्यमत्युच्चलदतुलरसाम्भोधितस्मिन्नसेवतं। वेषांकिंचिदहोत्योज्ज्वलमवि
लकलाकोमलाभीरबाला प्राणाः श्रीराधिकायाः किमपिरसनिधेःप्राड्कारंभजे
यः ॥६१॥ दुर्वासनामयहठरज्जुशतैर्निबद्धम् आकृष्यसर्वतइदंस्वबलेनकृष्ण। वृन्दा
वनेविहरतः सहराधयाते पादारविंदसविधंनयमानसंमे ॥६२॥ वशीकर्तुंशक्यो न
हि नहि मनागिंद्रियगणो गुणोभून्नैकोपिप्रविशतिसदादोषनिचयः। कथामः किं
कुर्मो हरिहरिमयीशोच्यकरुणाः स्ववासंश्रीवृंदावनवितरमानन्यगतिकं ॥६३॥

जातिश्रापणपनानि यांतमस्य यशोराशिः परिलीयतां सद्धर्मा विलयं प्रयांतु समनंतं सर्वैश्च निर्भ
र्त्स्यतां । अपि व्याधिशतेन जीर्यतु वपुर्लुप्तप्रतीकारतः श्रीवृंदाविपिनं तथापि न मनाक् त्य
क्तुं ममास्तां मतिः ।९४। रक्षति संसारभयाद्दोषाकरम् अप्यशेषदेहभृद्वृंदं । वृंदावनमिति
नेन प्रथितं तन्नौमि काननं किमपि ॥९५॥ वृंदारण्यादन्यत् प्रकृतेरन्तर्बहिर्वापि । नैवास्ति
मधुरवस्तिं नवकलितं यैर्न मत्तेभ्यः ॥९६ विभ्राजत्तिलकाकलिंदतनयानीरोघनीलांब
रा उद्दंचत्कांचनचम्पकच्छविरहो नानारसोल्लासिनी । कृष्णप्रेमपयोधरेण रमसे देनात्यंत
सम्मोहिनी गोपस्त्रात्मजवल्लभा विजयते राधेव वृंदावटी ॥९७॥ यस्मिन् कोटिसहस्रमेरपुर
युता भूमीरुहः पोषका भक्तिः सद्गुनिनामहारसमयी यत्र स्वयं श्लिष्यति । यत्र श्रीहरिदासवर्य
वनिताः स्वेह्लायमानाः शिलाः तद्वृंदावनमद्भुतं सुखमयं कोन्नाम नालंबते ॥९८॥ विंदंति
यावत् प्रणायं न मेदा वृंदावने प्रेमविलासमकंदे तावन्न गोविंदपदारविंद स्वच्छंदसद्भ
क्तिरहस्यलाभः ॥९९॥ स्मारंस्मारं नवजलधरश्यामलं धामविद्युत् कोटिज्योतिस्तुलित

वृंदा॰ कया राधया श्लिष्यमाणां। उच्चैरुच्चैः सरसमसरसी प्राज्ञवीजृम्भमाणा। प्रेमाविष्टो भ्रमति
श॰ सकृती कोपि वृंदावनांतः॥७०॥ राधापदांकभूषितवृंदारण्यस्थलीषु निर्भरप्रेम्णा हरि
५१ हरि। कदा लुठामि प्रतिपद गलदश्रुह्लसत्पुलकः॥७१॥ स्फूर्जोज्ज्वलत्प्रेमरसैकमू
५१ र्तिर् यत्रैव राधा विजवीहरीति। तदेव वृंदावनमाश्रितानां भवेत्परं भक्तिरहस्यलाभः॥ ७२॥
सर्वैस्पृष्टासरसमविशत्प्रेमपीयूषसान्द्रं वृन्दारण्येऽद्भुततरुलतागुल्मकाद्यैर्मनोज्ञे। राधा
कृष्णोज्ज्वलगुणगणोद्गानमत्तालिकावैर्नीरैणापि स्थितिमिह ततो ध्यावस्यावसन्न॥७३॥
श्रीराधायाः कनकरुचिरज्योतिरङ्गच्छटौघैः स्फुरद्वृषमोज्ज्वलरसमयैः सेव्यमानं समंतात्।
गोविंदस्याम्बुदरुचितनोर्ज्योतिरम्भाधिपूरैः सांद्रानंदात्मभिरचितं नौमि वृंदावनं तत्॥७४॥
निंदा वा स्तुतिरेव वा बहुविपत्सम्पत्तिरेवास्तु वा पांडित्यं वत मूर्खतापि यदि वा रागो
विरागोथवा। यत्किंचिद्भवनं श्रुतेरपि मनाग् लक्ष्यं न यद्देभवं न वृंदाविपिनं न जीवन
महं स्वप्नेहा तं तत्तमः॥७५॥ चांडालश्वपचराक्षियदि जनाः कुर्वंति सर्वे तिरस्कारं दुर्विषहं
५१

चनेन नहि मे खेदोऽस्त्यनीयानपि । देवा देव्य इमे च भूतनिवहाः प्राणाश्च दद्युर्महा स्नेहा
न्तेष्टिम तेन न मे गुरुत्वं स्पृहं वृन्दावनीये वसे ॥७६॥ भ्रातः समस्तान्यपि साधनानि विहाय वृन्दा
वनमाश्रयस्व । यथा तथा प्राकृतवासनावसानात् शरीरवानीह दयं विवेष्टतां ॥७७॥ तादृक्
कालो भवतु भगवान् येन कस्मिंश्चिदेनी दृष्यपाशाङ्कोऽप्यहह न वहिर्यामि वृन्दाटवीतः ।
तादृक् दम्भोऽप्युदयतु तथाहं कृतिश्चापि मे स्याद् येनाप्यस्मिन्त्वसमयवने रोचयेयं नित्य
वासं ॥७८॥ वृन्दारण्ये पह विहारिके रैश्वर्यपरभृतो भूमा मा मो भे नार्थ्यं स्वपचगृहवीथीषु दि
नशः । तथापि प्राचीनैः परमसुकृतैरत्र मिलितं न नेष्यामोऽन्यत्र क्वचिदपि कथंचिद्बहु
विदं ॥७९॥ जरत्कंथामेकां दधदपि च कौपीनमनिशं प्रगायन् श्रीराधामधुपतिरहःकेलि
लहरीं । फलं वा मूलं वा किमपि दिवसान्ते कवलयन् कदा नेष्ये वृन्दावनभुवि दशा जी
वनमयीं ॥८०॥ प्रकृत्युपरि केवले स्वविनियोपरब्रह्मणि श्रुतिप्रथितवैभवं परपदं
विकुंठाभिधं ततं न रविलोज्वलं जयति माथुरं मंडलं महारसमयं सखे कलय नन्द वृन्दा

वृंदा॰ वनं ॥८१॥ कदा वृंदारण्यं श्रवणमननस्पर्शननिरीक्षण घ्राणाद्यैरमे स्फुरतिवसमि
व॰श॰ च्छन् श्रवदिव। कदावानत्लोकोनरवसमदांयोमयुपते गुणानेच्चैहच्चैः सरसमुप
५२ गास्यामिपरितः॥८२॥ ह्यानंदसच्चिद्घनरूपतामतिर् यावन्ननवृंदावनवासिजंतुषु।
52 तावत्सविशेषिननवर्विन्दते ततोपराधात्परवीपरात्परां॥८३॥ यदेवसच्चिद्रसरूप
बुद्धिर् वृंदावनस्तस्थिरजंगमेषु। स्यान्निर्विलीकं प्रणयस्तदैव चकास्तिराधाप्रियसेम
विरूपः॥८४॥ सकलविभवसारं सर्वधर्मैकसारं सकलभजनसारं सर्वसिद्धैकसारं।
सकलमहिमसारं वस्तुवृंदावनान्तः सकलमधुरिमांभोराशिसारं विहारं॥८५॥ दैवी
वाक्प्रतिषेधिनीभवतुमेस्याद्वानुहूरणगिरां श्रेणीशास्त्रविदामिहास्तुवहुधायः
कोपिकोलाहलः। त्यक्ता साधनसाध्यजातमखिलं लगोनमेराधिका क्रीडाकाननवा
ससम्पदिमनाक् व्यावर्ततेनोमनः॥८६॥ प्रगायन्नुदृत्तन्नालसन् वपुर्भावन् हदन्
सम्पतन् मूर्छितोवा। कदावामहाप्रेममाध्वीमदान्धम् चिरष्यामि वृंदावनेलोकवाह्यः॥८७॥

नलोकं नधर्मं नगेहं नदेहं नानिंदास्तुतिस्वापि मोत्खंनदुःखं। विजानन् किमप्युन्मदप्रेम
माध्व्या ग्रहग्रस्तवत्कर्हिवृंदावनेस्यां॥८८॥ हेरक्त त्राक्त स्तेति क्रोशन्ति मुख्यान् महाश्चर्य
नामावलीसिद्धमंत्रान्। कृपामूर्तिचैतन्यदेवेनगीतान् कदाभामयन्वृंदावनेस्यांकृतार्थः॥८९॥
हेमस्फाटिकपद्मरागरचितैर्माहीद्रुनीलेंद्रमैः नानारत्नमयस्थलीभिरलिभिर्झंकाररविता ॐ
द्रुलिभिः। चित्रैःकीरमयूरकोकिलमुखैर्नानाविहंगैर्लसत् पद्माद्यैश्चसरोभिरद्भुतमहं
ध्यायामिवृंदावनं॥९०॥ ताम्बूलपानकमनोहरमोदकादि रम्यैलसन्मृदुलपल्लवचारुतल्पैः।
हृद्यप्रियनालिभिरहोसहृदावपेत्य वृंदावनं स्मरनिकुञ्जगृहैर्मनोज्ञैः॥९१॥ क्वापिद्रुतिवि
मर्दितप्रसवतल्पकैः कुत्रचित् रतोपकरणान्वितप्रियमृदुप्रसूनालयैः। क्वचित्प्रमदराधि
कामधुपतिप्रवृत्तोत्सवैः सदानवनिकुंजकैः स्मरसमंजुवृंदावनं॥९२॥ राधाकृष्णरहः स
हृन्निति थरस्यापत्यकामस्फुरन् नानाकेलिनिकुंजवीथिषुनवोन्मीलत्कदम्बादिषु।
भ्रामंभ्राममहर्निशंनतुपरंश्रीवामकेलिस्थली रम्या सैव कदाप्रकाशितरहःप्रेमाभवेयं

वृंदाव. त्पती ॥८३॥ अलं त्वयि सदुःखैर्देह युवतिपुत्रवित्तादिकैर् विमुक्तिकथयाप्यलं मम न
शु. मोक्षकुण्ठधीये। परत्विह भवे भवे भवतु वा घमानस्थितो भजेन्नूतनयौवने लसति
५३ यत्र तस्मिन् रतिः ॥८४। नमामि वृंदावनमेव मूर्ध्ना वदामि वृंदावनमेव वाचा। स्मरामि
53 वृंदावनमेव बुद्ध्या वृंदावनादन्यदहं न जाने। ८५। राधापतिरतिकंदं वृंदावनमेव जीव
नं येषां। तच्चरणाम्बुजरेणो राशामेवाहमाशासे। ८६। शृण्वंति शुकसारिकाः स्तव
रितानि राधापतेः नदंत परितुष्टये न हि लता सदोत्फुल्लिताः। सरांसि कमलोत्पलादि
भिरयुस्त्वयत्रश्रियं नटुत्सवहृते मनः स्मरत देव वृंदावनं। ८७। नानाकेलिनिकुंजमंड
पयुते नानासरोवापिका रम्ये गुल्मलताद्रुमैश्च परितो नानाविधैः शोभिते। नानाजाति
समुल्लसत्खगमृगैर्नानाविलासस्थली प्रद्योतद्युतिरोचिषि प्रियकदा ध्येयासि वृंदावने।
यत्रैवातिरसन्मदं विहरतो मत्प्रेष्ठवल्लद्वयं। ८८ भक्तिकपि महारसोत्सवमयी यत्रैव
निस्पन्दते। तत्रैव प्रविशन्ति नैव निगमश्रेणी गिरां भङ्ग्यः तस्मिन्नेव ममास्तु धीः प्रण

यिणी वृंदावने पावने ॥ ९९ ॥ वान्या गद्गदया कदा मधुपतेर् नामानि संकीर्त्तये धाराभिर्नय
नांभसां नहतलस्तोणीं कदा पङ्कये। दृष्ट्वा भावनया पुरो मिलदिव स्वान्तस्वभोग्यं महीद्वंद्वं
हे महरिन्मणीच्छविकदानस्य मुहुर्विह्वलः ॥१००॥ वृंदारण्यनिकुंजसीम निवसन् प्रेमा
न्तश्चित्तयन् स्वप्राणैकघनं किशोरमिथुनं दृष्ट्वाप्यकस्मात्कदा श्यामाकाश्वनचंद्रि
कारसमयी गौरीश्च काश्चित्छटाः पश्यामि स्फुरणुद्यां च शीतमधुरा काश्चिन्मिथो वाक्सुधा ॥१०१॥
वृंदारण्ये किमपि जननादुःप्रवेशप्रदेशे गत्वा प्रोद्यैर्निजदयितयोर्नामजल्पन्नुदश्रुः।
श्रांतस्तान्यो विकलविकलो दिव्यम्नैकयापि श्रीश्वर्याज्ञाकरसुगदृशा वाकृपास्वासि
तः स्यां ॥१०२॥ एतत्कारुण्यपुंज्ञकतिदिनकलितस्वाश्रयप्रौढिराधा कृष्णांघ्रिद्वंद्वगूढ
प्रणामयरमास्वाद्भितो साधु दृष्टेः। श्रीमद्वृंदावने येनिजमहितपराकारिरूपेन सांद्रा
नंदैघस्य दिव्याप्रोज्ज्वलितमधुरिमैकार्णवेनाविराहां ॥१०३॥ कदा महद्भावनोदितनि
जेष्टरूपो मनागपि स्मृतशरीरको न हि रसेप्रविशांघ्रिते। त्वरणं किमु महत्तर्कं किमथ

वृंदा॰ वानमेवाश्रयितो वहिर्द्दगपि मुग्धवद्धा बहु विहरामि वृंदावने ॥९४॥ न त्यक्ष्यामि न शृ
शत॰ ण्णोमि न चिंतयामि नान्यद्भजामि न भजामि न चाश्रयामि। पश्यामि जाग्रति तथा स्वपने
५५ पि नान्यत् श्रीराधिकारतिविनोदवनं विनाहं ॥९५॥ किं मा खेदयसे विमुंच वसनं न त्वेव त
55 स्मिन्क्षणे नागत्य स्वपिहि त्यज त्यज भुजं क्षिप्यामि कांते सकृत्। आः किं निर्दय मंच मुंच
न किमप्यापीड्येराधिका हा सालापमिमं कदा नु शृणुयां वृंदाटवीकीरतः ॥९६॥ कदा
वा स्वच्छंदं दिनरजनि वृंदावरवने चरन्नेकाकी नःस्वस्तुतनवनिजकुंजानि प्रविशन्। अ
कस्मादेकमौकिरमयुरकैः पोरस्थया इतो नत्वं याया इति मृदु गिरा वारयति मां ॥९७॥
कदा वा तृष्णाकः शिथिलितसमस्तव्यवहृतिस् त्यजन्दीर्घश्वासं कथमपि गृहीतैककवलः।
सदा जाग्रत्त्रायद्दृशामुदितं तद्दातिमधुरं न दालोके वृंदावनभुवि निजप्राणमिथुनं ॥९८॥ अक
स्मादेकस्मान्नवललितकुंजाद्बहिर् भवत्स्मित्वानं ध्यान नरूणमिथुनेलौकिकमिवं। गतो दूरं
दृष्ट्वा पुनरथनिवृत्य स्वदयितो वितर्कैस्यां वृंदावनभुवि महाप्रेमविकलः ॥९९॥ कदापूर्णा

ज्योत्स्नायवलजनैर्वासवलये चरन्नेको वृंदावनप्रतिविलासस्मृतिपरः । अकस्मादानं
दाम्बुधिलहरिकोलाहलमिव ध्वनिं दिव्यं वेणोर्वलयरसनादेश्च शृणुयां ॥१०॥ कदा वा
कस्यापि स्फुटनवकदम्बस्य विटपे स्फुरद्भ्रापीभर्त्तुः किमपि कवयेस्मरवदनं । कदा श्रीरा
धायाः कुसुमचयलीलाचललितं करं वृन्दे वृंदावनभुवि लतासक्तमपि वा ॥११॥ इदं मे
किं भावि स्फुटकनकगौरच्छविहरिन्मणिश्यामं धामद्वयमिह मिथो मेर्पितभुजं । निरीक्षे
नत्वैसं बहुविधमहाप्रेमविहृतिं स्मितं पश्चाच्छायाद्वयमथ पुरो मूर्छयति मां ॥१२॥ अपि
प्रेमोत्कण्ठात्त्रितिषु विलुठन्सर्ववपुरिदं करेणास्पृष्टामामनुचरयेन राधाप्रियपुना । अहो
वृंदारण्ये अद्भुतमहिमसीमन्यपि स्फुटं यदा शाकापाकास्समुदयति हा किं न भविता ॥१३॥
कदा वा कालिंदीतटनिकटवृंदावनलता निकुंजात्तः स्मेरं नदति सरसं प्रेष्ठमिथुनं । मिथो
गाढाश्लिष्टं स्फुटदृढमयालालितपदं मुदा वीक्षे स्वप्नेप्यहह सवनिद्रागतमहं ॥१४॥ महा
श्चर्यानंतस्वमहिमबलादेवमकला धमस्याप्याशानां अतिकरमसमप्याशमपि मे । कदा

वृंदा वनश. ५५ 53

वृंदारण्यं स्ववसतिकथामात्रनिर्वहंत कृपापूरैः संपूरयतु परतो पूर्वदुर्दृजनेः ॥१५ स्व
कर्मश्रेणीनाभिः सततममितश्चालितमहो प्रभो जीवं यत्र क्वचिदपि नयास्तत विवशं ।
परं त्वेतावन्मे भवतु भवदुःखार्दितहृदो प्रविश्रान्तं वृंदावनपरपदे वास्तु रमना ॥१६॥
न सत्याद्ये लोके स्पृहयति मनो ब्रह्मपदवी नवैकुंठे विष्णोरपि मृगयते पार्षदतनुं ।
अपि श्रीवृंदावनसरसभावोत्सवरतां निवासे धन्यानां स बहुकृतिमिमन्यापि मनुते ॥१७॥
श्रीमद्वृंदाविपिनकुसुमामोदवाही समीरो यस्मिन्देशे सरति न दवच्छिन्नकृष्णास्तुतो
वा । येषां वृंदावनमनुसस्फूर्त्तिवर्यासनंतं वा तैर्नैवालं मम खलजनैर्हन्ति तेषां दृ
ष्ट्यपि ॥१८॥ ममापि स्यादेतादृशमपि दिनं किं नु परमं यदा वृंदारण्याः कथमपि कृत
स्पर्शनमपि । अहो देहं हरादपि समवलोक्यापि जनुषा मुहुर्धन्यंमन्ये परमपतितः स्यां
कृतनतिः ॥१९॥ यदपि च मम नास्ति श्रीवृंदावनीये महिमनि न समोऽहं हंत विश्वासरंगं
यः यदपि मम न तस्मिन्नास्ति वा मेषनापि प्रसरतु मम मन्दस्यैव वाणी तथापि ॥२०॥

अद्यैतन्नंघ्राघंजगदिदमहोसर्वविदपि अप्यीयःश्रीवृंदावनमाहात्म्यवीजाज्ञनिमतिः। अहो
भ्राम्यद्दृष्ट्वाविविधमदमहृत्स्मृहतनथा नपूर्णासाश्चिन्तं परमिहहनिषेवेपदरजः ॥१२१॥ हा
वृंदावन हा महारसमय प्रेमैकसम्पान्निधे हाराधावतिनागरस्मरकला साक्षिन्मदेकाप्रि
य। हाराधेस्मरविभ्रमर्छनलतावल्लीखगाद्यद्भुत श्रीमद्भावप्रकृतेःपरादपिपरंत्वमेगति
स्त्वगतिः ॥१२२॥ नमोस्तुवृंदावनसुंदराभ्यां नमोस्तुवृंदावनविभ्रमाभ्यां। नमोस्तुवृंदाव
नजीवनाभ्यां नमोस्तुवृंदावननागराभ्यां ॥२३॥ नमोस्तुवृंदावनसत्स्वरूपाभ्यां नमोस्तुवृं
दावनसद्दृशाभ्यां। नमोस्तुवृंदावनभूषिताभ्यां नमोस्तुवृंदावनगोचराभ्यां ॥२४॥ वृंदार
ण्येपात्तमंनास्ति नास्तिमत्तोधमंक्कचित् राधानाम्नःप्रभावेनयदिस्यान्मेलनंतयोः ॥१२५॥
श्रीवृंदावनेसर्वी सत्कृन्नामैकमंगलं सर्वैश्वर्यानंतशक्ति मूर्त्वेविजयतां मम ॥१२६॥
इति श्रीवृंदावनशतकंसमाप्तं॥

वृंदाव
नयम
कं॰
५६
56

॥ ओम् ॥ वरदाय नमो हरये पतति जनोऽयं स्मरन्नपि न मोहरये ।
बद्धशस्त्रचक्रं दहता मनसि द्वितिभूयेन दैत्यचक्रं दहता ॥१॥ स्वमिव भुजं गवि शेषं
वपुपधाय स्वपिति यो भुजंगविशेषं । नवपुष्करसमकरया श्रीयोर्मिपंक्त्या च सेवितः
समकरया ॥२॥ येनच बलिरसुरेशः समवस्थापितः क्षितेरसुरेशः ॥ इक्षुकः सन्निभ
वदनः चित्तेपच यः सरोजसन्निभवदनः ॥३॥ विशेषकं ॥ सौमित्र लांगलवंतं
देवं यः संयुगे च लाङ्गूलवंतं । कपिमकरोद्रसरहितं द्विविदं दृढमुष्टिताडनादसुरहितं ॥ ४॥
आपानपरंपरया भेजे यैरेवती जितपरंपरया । विभ्रमतमालानाभौ बाहुमयत्रकुसुमाश्र
मालानाभौ ॥५॥ योऽह्नव मदाहरणाया तन्वा प्रणौति प्रतिद्विषमदाहरणाया ॥६॥ ग्रहपति
रिवहिमहीनः कांत्याभूदुग्रसेनऋतिहिमहीनः । प्रकृतिभिरविहितोह स्वपंधुमः संह
ताभिरविहितोहः ॥७॥ बलिभिद्दरीभागानां जेता विंध्यदेवदरीभागानां । योकूल्पा
दाघार्हस्य प्रभवाय शसः समस्त्रदाघार्हस्य ॥८॥ योभोक्तेव सभायाः वर्णोकविः शाधि

नाच वसुधायाः। यस्य परागुदधीनां नदेषु दृतिं प्रचचलेऽगुदधीनां ॥९॥ भरतइव विभावसवः
सर्वेषां प्राणिनामथ विभावसवः। यस्मिन्वसुधा भवति स्थिरा वभुवुः समास्तु वसुधा भवति ॥१०॥
अनुकृतमरघोराजः प्रत्यग्रोनाशनः प्रभुरघोराजः। योगिभिरित्यस्तमितः केशव माप्नोमि
नाथ मस्तमितः ॥११॥ न स्येयमकार्येभ्यश्च्युतेन न नयेन रचितयमकार्येभ्यः। इनावाकृत्वा
कृतिना मानांकेन हरिसंश्रया त्वाकृतिना ॥१२॥ अग्रजगमनतरुतमसौ वयसा वृंदावनांतरहरुत
मसौ। हरिरहितनकुमुद्दसितः स्निग्धनरांकुरलता हलीकुमुद्दसितः ॥१३॥ उदधिपयोनिर्घोषं
नत्र निवेशपाचुनोः पयोनिर्घोषं। अविचिंतितनकंसबलश्चचार भेजे च यामुनकं सबलः ॥१४॥
प्रियसुहृद्दामोदरयोर् ललितौ यथैरोहिणेयदामोदरयोः। कृतपशु वृंदावनयोर् धर्मः क्षयमा
पदयितवृंदावनयोः ॥१५॥ क्षोभमगाद भ्राणां हानिर्नैर्विधुवनाम मगाद भ्राणां। मुनिरपि नी
रागमनाः सरिच्छ्रासं प्रवृत्तनीरागमनाः ॥१६॥ सोऽइंकं दर्पणस्य प्रथमो हेतुर्बभूव कंदर्पस्य।
स्त्रीहृदयान्यभिदनतः सशरैः प्राप्य सुहृदा घनानभिदनतः ॥१७॥ विधुर्झौरी हावान् अक्रूरेव

वृंदाव नयम कं ५७ 57

घनेषु भृङ्ग गौरीहावान्। सुलभवलाकायेषु ग्लपितचिरप्रोषितबलाकायेषु ॥१८॥
ज्योत्स्ना मज्जालकया यूथिकया चाभ्रयुवतिसज्जालकया। कमलानि ससर्जाभ्रा भ्रमरः
कुसुमो वलादिव ससर्जाभ्रा ॥१९॥ प्राप्य दिशो दशानिभृतः स्तरणमपितस्यौशा सनादस
निभृतः। संसमितागवलस्य स्वनत् घनौघसमप्रभोगवलस्य ॥२०॥ भ्रमर दशा कदम्बरजः
त्वमितीव वदन् स्वनादशाकदम्बरजः। हंसं तु विभ्रमरहितां नलिनीं पथिकाङ्गनात्रु विभ्रम
रहितां ॥२१॥ ज्योत्स्नालं घनमलिना नवभोक्ति यतेस्म कुटजलं घनमलिना। वलवान
वपूरोहन् हृद्याम नदीतटांश्च नवपूरोऽहन् ॥२२॥ शिखिषु समन्त्स कमनसो गतिह
रमुञ्चन्ति चैव समुत्सुकमनसः। असमुञ्चन्नपवनजवना वापीर्हंसाश्च नवपवनजवनाः ॥२३॥
प्राह्वो नादेयानां कलुषतया नोशशाम नादेयानां। फेनो वानीराणां प्राकृष्टोभयत
टान्त्रवानीराणां ॥२४॥ प्राप्य सखद्योततायां निशि विद्युज्जितमरुत्समखद्योतायां। प्रियतमस
दृंत गेहा दवलाभयमुत्ससर्जमदनंगेहा दवलाभयमुत्ससर्जमदनंगेहा ॥२५॥

पर्वतकटकेशानां नीपरजःकपिलकुंभकटकेशानां। कुंजनदीनगजानां हर्षो जज्ञे

महान्नदीनगजानां ॥२६॥ विविधोपलराशिखरं पिदधे गोवर्द्धनं तृणैराशिखरं।

कोलाः गंधाराववान् अकरोत्कुंजटशिखिनां च गंधाराववान् ॥२७॥ कणिकाभिरपां

सुखरां वृंदावनमारुता ववुरपांशुखरा। यमुना नवमृदकपटं भेजे ब्रजलोकमाश्रि

तामुदकपटं ॥२८॥ आतपनवसुदेवसुतौ ब्रजस्य साभ्रे ननेऽह्निवसुदेवसुतौ। अमृतस

मधुनीपवनं वृंदावनमविशतां समधुनीपवनं ॥२९॥ शिखिसर्वस्वयरस्य हेप्रियतां

जग्मतुर्हरेःस्वयरस्य। भ्रमरकदम्बकरवहा वेणुःशाद्वलतथाकदंबकरवहा ॥३॥ अंशा

दामोदरस्य स्थानमवधंशिनीपदामोदस्य। श्रीलेलिलिनमथोव्रजतः कापि वभूवास्यमुहि

कमथोव्रजतः ॥३१॥ धृतकाममधुरैर् मधुरैर् भ्रमरैरभ्योमुदिनवल्लवकुलैर्वकुलैः। वन

केशिशिराः शिशिराः स्थलीर्यनाःप्रायमेः सुसुरभीःसुरभीः ॥३२ नातृणभरणाभ

रणा स्तोनयुताःस्वयमिवांजनभसा नभसा। रेजुःसुतरां सुतरां यमुनामभितः सवंजु

वृंदावन ललना ललना ॥२३॥ अष्टपद्मारोहिण्याः सत्तोप्यलंघ्यमहिमा पद्मारोहिण्याः ।
यमकं प्राप्य शरीरं तं तुंगं श्रुतिश्च सखा गतः शरीरं तुंगं ॥२४॥ निचुलवंती ककुभानां समो
मतिस्तानि कांतिभिः ककुभानां । अशेन स्तनवद्या अजे वहन्नपि वदलिकुलं स्तनवद्या ॥२५॥
५८ दृष्टोद्धवलासितया लिम्पन्निव दिङ्मुखानि धवलासितया । पद्मथा पवनेच्छायां
58 प्रावृषि मेघानयात पवनेच्छायां ॥२६॥ अथ सबलक्षोभानां पतिरिव कर्तारमखिल
क्षोभानां । मसलीदं तरगहने वीक्ष्य गिरिं प्राह कुटजदंतुरगहनं ॥२७॥ विदधच्छत्रः
छत्रः कुटजैः चरति प्रगीतगोपो गोपः । प्रस्वनदभ्रोदभ्रः स्पष्टविशेषोयमततलथा
तरुपातुः ॥२८॥ पश्य श्यामा श्यामा वनस्थली भाति वलवदृश्या दृश्या । प्रदरा धारा
धारा पुलंकतिमेघाश्वशिरसि हंते हंते ॥२९॥ अस्मसकंदलदशनैः रुद्धमति दरीमुखे
ष्व कंदलदशनैः । दीयतोच्युत हेममयः तवचरवीन्द्रो विवाच लोहेममयः ॥३०॥
शकुनिपताकाशबलं घनवृंदचत्तुषापताकाशबलं । हृपंहारीतानां श्रियं वनानां

च मनहारीतानां॥४०॥ पूर्वं स्मरहरे शेषे यान्मेघान्वीक्ष्य भूस्त्रमहरे शेषे। जनितरति
रसावसितैर् आदाय तडिद्गुणान्नवरसावसितैः॥४१॥ कार्मुकवलयमनूनं दिशासि य
नोषितोऽसि वलयमनूनं। इत्याशामुखरतया घनराज्या हरिरिवोच्यते मुखरतया॥४२॥
न तवोपरि वर्हिणां ग्रथिताभरणस्य गोपयपरिवर्हिणां। छायामसितापघनः सुरचापांकः
परैरकासितापघनः॥४३॥ हतगिरिधातुरसङ्गा हृष्यानवभुजसमेमार्मिधातुरसङ्गा। कुला
निखनद्यमुना वहति जलमसौ विसर्पति खनयमुना॥४४॥ पवनैरजसा ध्वस्तं विभ्राणां
नीपमात्मरजसा ध्वस्तं। पश्येकोतनतरलतां स्थलीमितां वर्हियोगकांततरलतां॥४५॥
वसनेन संप्लवन नवा जेतु मलममोघ संप्लवन नवा। मधुकरविश्वसितानि स्मितमिह
कुटजानि जनितविस्रसितानि॥४६॥ मारुतवेगाद्भुक्षवनवशशिखिंडानां मुक्तापांग
विडंवितनवशशिखिंडानां संघाः शिखिनां प्राप्ताः शङ्कूकायंते स्थलघनमिति मत्वानाः
शंकेकायंते॥४७॥ पश्य शिलाः शैलेऽस्मिन्नुच्चावचसानो यान्तुन्मुखवर्हिणानामुच्चावच

वृंदावन
यमकं

सानौ (यात्सुन्मुखबर्हिणामसुया) । अमुनाप्यामितनरिपुह्रीश्रृंगारोहितं याचितस्त्वं
वुनादैः श्रृंगारोहितं ॥४९॥ नदतिजलदैर्निदाघे सारंगोपास्ते विभ्रतिकेतकमवने:
सारंगोपास्ते । सप्रस्तुयमकालो नवाहिनीपानां तन्मुखसरभीनां च श्रीर्नवाहि
५८
नीपानां ॥५०॥ इत्याह पीतवाससमायतनेत्रंस्त कंसामरात्यशुमतामायतनेत्रंस्त
कंसामरात्यशुमतामायतनेत्रंस्त । हसितानां विमलतया सहलीलाजानां ॥५१

इति श्रीवृंदावनं नाम यमककाव्यं मानाङ्क:

कृतं समाप्तं ॥ ३५ ॥

नं ८६